श्री वेंकटेश द्वादशनाम स्तोत्रं

श्री वेंकटेश द्वादशनाम स्तोत्रं

अस्य श्री वेंकटेश द्वादशनाम स्तोत्र महामंत्रस्य ब्रह्मा ऋषिः अनुष्टुप् छंदः श्री वेंकटेश्वरो देवता इष्टार्थे विनियोगः |

नारायणो जगन्नाथो वारिजासनवंदितः |
स्वामिपुष्करिणीवासी शंखचक्रगदाधरः || 1 ||

पीतांबरधरो देवो गरुडासनशोभितः |
कंदर्पकोटिलावण्यः कमलायतलोचनः || 2 ||

इंदिरापतिगोविंदः चंद्रसूर्यप्रभाकरः |
विश्वात्मा विश्वलोकेशो जय श्रीवेंकटेश्वरः || 3 ||

एतद्द्वादशनामानि त्रिसंध्यं यः पठेन्नरः |
दारिद्र्यदुःखनिर्मुक्तो धनधान्यसमृद्धिमान् || 4 ||

जनवश्यं राजवश्यं सर्वकामार्थसिद्धिदं |
दिव्यतेजः समाप्नोति दीर्घमायुश्च विंदति || 5 ||

ग्रहरोगादिनाशं च कामितार्थफलप्रदं |
इह जन्मनि सौख्यं च विष्णुसायुज्यमाप्नुयात् || 6 ||

इति ब्रह्मांडपुराणे ब्रह्मनारदसंवादे श्री वेंकटेशद्वादशनामस्तोत्रं |